SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-3, (Jul-Sep) 2025

# योगोपनिषत्प्रतिपादितयोगाङ्गेषु नियमविमर्शः, साम्प्रतं तदुपादेयता च
## Yogopaniṣatpratipāditayogāṅgeṣu niyamavimarśaḥ, sāmpratam̤ tadupādeyatā ca

**Raju Samanta**
State Aided College Teacher
Dept. of Sanskrit
Rabindra Bharati Mahavidyalaya
Kolaghat, Purba Medinipur, West Bengal, India
Email: sanskrit.raju.191@gmail.com

**Abstract:** भारतीयाध्यात्मदर्शने भारतीयचिन्तने च योगविद्यायाः प्रभूतस्थानं विद्यते। प्राचीनकालात् आधुनिककालान्तं योगस्य अतीव महत्वमस्ति। साम्प्रतं विज्ञानयुगे विचरणशीलाः जनाः योगविद्याविमुखाः भवन्ति तथापि मानसिकस्वास्थ्यस्य विकासक्षेत्रे, आध्यात्मिकस्वास्थ्यस्य विकासक्षेत्रे, मानवीयगुणविकासक्षेत्रे, मानसिकशोकविनाशक्षेत्रे, सामाजिकस्वच्छताबर्धनक्षेत्रे च योगस्य नियमस्य वा भूमिका अन्यतमा। अतएव साम्प्रतं विज्ञानयुगेऽपि विचरणशीलजनद्वारा योगस्य नियमस्य च प्रत्यहम् अनुशीलनं कर्तव्यमिति मे मति।

**Keywords:** नियमः, तपः, सन्तोषः, आस्तिक्यम्, दानम्, जपः, मतिः, सिद्धान्तश्रवणम्, ईश्वरपूजनम्।

**प्राक्कथनम् –**

वेदस्य अन्तिमभागास्ति उपनिषद्, अतएव उपनिषदो वेदानामुपसंहारात्मकसारभूताः तथा च उत्तरमीमांसादर्शनस्य वेदान्तदर्शनस्य वा कृते आधारभूताः। उपनिषदः न केवलमात्रं वेदान्तदर्शनस्य अपितु भारतीयदर्शनस्य भित्तिशिलाः सन्ति। पुनश्च वेदस्य सर्वोच्चस्थानीयाः धार्मिकाः दार्शनिकाः च ग्रन्थाः सन्ति उपनिषदः। मुक्तिकोपनिषदि श्रीरामचन्द्रेण उक्तं जीवः साधकः वा विदेहमुक्तिम् इच्छति चेत् तर्हि साधनेक अष्टोत्तरशतोपनिषदां पाठः कर्तव्यः। वयं सर्वे जानीमो ब्रह्मविद्या भवति उपनिषदां मुख्यविषयास्ति, परन्तु तत्र ब्रह्मविद्यां प्रतिपादयन्तो योगतत्त्वानि उपस्थापितवन्तः उपनिषद्वक्तारः। पुनश्च संस्कृतवाङ्मयेषु काश्चिदुपनिषदस्सन्ति, यत्र साक्षाद्रूपेण पातञ्जलयोगदर्शनस्य सिद्धान्तास्तथा च योगतत्त्वानि विद्यन्ते; एकत्रितभावेन तैव उपनिषदो योगोपनिषदिति नाम्ना प्रसिद्ध्यते अखिलजगत्यस्मिन्।

योगाङ्गनियमाधारीकृत्य वेदेषूपनिषत्सु दर्शनशास्त्रेषु पुराणेषु स्मृतिशास्त्रेषु भूरिशः तथ्यानि अवलोक्यन्ते। परन्त्वत्र केवलमात्रं योगोपनिषद आधारीकृत्य प्रस्तूयते शोधलेखोऽयम्। अधोलिखिते विषयोऽयम् उपस्थाप्यते मया —

**नियमस्य स्वरूपम्**

अष्टविधेषु योगाङ्गेषु नियमो भवति द्वितीयमङ्गम्। नि-उपसर्गपूर्वकात् यन्-धातोरुत्तरात् अप्-प्रत्ययसंयोगेन नियमः इति पदं जायते। यस्य अर्थो भवति नियन्त्रणम्। अतएव मनसः चित्तस्य वा व्यापारनियन्त्रणमेव नियमः। भगवता पतञ्जलिना प्रोक्तम् –

"शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः"[1]।

अतएव शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानि एतानि पञ्च एकत्रितरुपेण नियमः इति नाम्ना अभिधीयते। पुनश्च त्रिशिखिब्राह्मणोपनिषदि विद्यते यत् –

"अनुरक्तिः परे तत्त्वे सततं नियमः स्मृतः"[2]।

परमात्मानं प्रति सततम् अनुरागवत्स्थितिरेव नियमः। पुनश्च सिद्धसिद्धान्तपद्धतौ श्रीगोरक्षनाथेन निगद्यते – "नियम इति मनोवृत्तीनां नियमनम् इति। एकान्तवासः, निःसङ्गता, औदासीन्यम्, यथाप्राप्तिसन्तुष्टिः, वैरस्यम्, गुरुचरणावरूढत्वम्-इति नियमन – लक्षणम्"[3]॥

**नियमस्य प्रकारभेदः**

संस्कृतवाङ्मयेषु नियमस्य विविधाः प्रकारभेदाः दरीदृश्यन्ते, यथा योगसूत्रे भगवता पतञ्जलिना पञ्चविधाः नियमास्स्वीकृताः, तानि तावत् शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानि। तदुक्तञ्च –

"शौच-सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः"[4] ।

मण्डलब्राह्मणोपनिषदि दरीदृश्यते यत् –

"गुरुभक्तिः सत्यमार्गानुरक्तिः सुखागतवस्तनुभवश्च तद्वस्त्वनुभवेन।
तुष्टिर्निः सङ्गता एकान्तवासो मनोर्निवृत्तिःफलानभिलाषो वैराग्यभावश्च नियमा।।"[5]

योगतत्त्वोपनिषदि अहिंसा एव भवति नियमस्य एकमात्रप्रकारभेदः। तदुक्तञ्च— "अहिंसा नियमेष्वेका मुख्या वै चतुरानन"[6]। पुनश्च त्रिशिखिब्राह्मणोपनिषदि एवं रूपमस्ति –

"तपःसन्तुष्टिरास्तिक्यं दानमाराधनं हरेः।
वेदान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम्"॥[7]

शाण्डिल्योपनिषदि— "तपः सन्तोषास्तिक्यदानेश्वरपूजनसिद्धान्तश्रवणह्रीमतिजपव्रतानि दश नियमाः"[8]।

जाबालदर्शनोपनिषदि –

"तपःसन्तोषमास्तिक्यं दानमीश्वरपूजनम्।
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम्"॥[9]

वराहोपनिषदि –

"तपः सन्तोषमास्तिक्यं दानमीश्वरपूजनम्।
भिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम्।
एते हि नियमाः प्रोक्ता दशधैव महामते"॥[10]

अतएव त्रिशिखिब्राह्मणोपनिषदि, शाण्डिल्योपनिषदि, जाबालदर्शनोपनिषदि, वराहोपनिषदि च नियमाः दशविधा उल्लिखिताः, तानि तावत्— तपःसन्तोषास्तिक्यदानेश्वरपूजनसिद्धान्त-श्रवणह्रीमतिजपव्रतानि। एवं रूपेण अखिलजगति नियमस्य विविधाः प्रकारभेदाः समुपलभ्यन्ते। अधोलिखिते योगोपनिषदनुसारं नियमविषयः यथामति मया आलोच्यते।

**क. तपः –**

नियमेषु तपः भवति प्रथमः। तमो नाम क्षुत्पिपासाशीतोष्णादिद्वन्द्वसहनम्। अतएव अन्तरे सहनशक्त्यर्जनमेव तपः। धर्माचारणकाले हानिलाभः, सुखदुखम्, पिपासाजिघात्सा, मानापमानः, शीतोष्णादिद्वन्द्वं शान्तचित्ते सहनमेव तपः। तदुक्तञ्च – तपः द्वन्द्वसहनम्[11]।

विधिपूर्वकं चान्द्रायणादिभिः व्रतेभ्यः शरीरं शोषणमेव तपः। विषयेऽस्मिन् विद्यते यत् – "तपो नाम विध्युक्तकृच्छ्रचान्द्रायणादिभिः शरीरशोषणम्"[12]। इतोऽपि –

"वेदोक्तेन प्रकारेण कृच्छ्रचान्द्रायणादिभिः।
शरीरशोषणं यत्तत्तप इत्युच्यते बुधैः"॥[13]

कायेन मनसा वाचा सम्यक्तया तपानुष्ठनं करोति चेत् अशुद्धिक्षयात् कायेन्द्रियसिद्धिः भवति, पुनः असन्निकटवस्तुनः द्रष्टुम्, श्रोतुञ्चेति शक्नोति। तथा चोक्तम्– "कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः"[14]।

**ख. सन्तोषः –**

सम् तुष् घञ् इति प्रक्रियात्वात् सन्तोषः पदमुत्पद्यते। यस्य अर्थः तावत् शान्तिः, परिशुद्धिः, प्रसन्नता, हर्षश्च। सन्तुष्टिः एव भवति सन्तोषः। अतः अधिकवस्तुप्राप्वासनापरित्यागः खलु सन्तोषः। सन्तोषस्य लक्षणमेवरूपम् – "सन्निहितसाधनादधिकस्य अनुपादित्सा"[15]।

अतएव यावता शरीरयात्रा भवति (जीवनं भवति) ततोप्यधिकसंग्रहणेच्छाशून्यता। तदुक्तञ्च— "सन्तोषो नाम यदृच्छालाभसन्तुष्टिः"[16]। इतोऽपि जावालोदर्शनोपनिषदि एवम् –

"यदृच्छालाभतो नित्यं प्रीतिर्या जायते नृणाम्।
तत्संतोषं विदुः प्राज्ञाः परिज्ञानैकतत्पराः"॥[17]

सन्तोषाभ्यासेन अनुत्तमसुखं लभ्यते। अर्थात् तृष्णारहितावस्थायां यद् सुखम् अनुभवति, तद् सुखं स्वल्पविषयभोगरुपसुखात् अधिकश्रेष्ठतमम्। तथा चोक्तम्– "सन्तोषादनुत्तमसुखलाभः"[18]। पुनश्च भगवता व्यासदेवेन कथ्यते— "तृष्णारहितावस्थायां यद् सुखमनुभवति, तस्य सुखस्य षोडशभागेषु एकभागः नास्ति विषयभोगरुपसुखम्"।

**ग. आस्तिक्यम् –**

परमात्मनि पूर्णविश्वासः एव आस्तिक्यमिति। जावालदर्शनोपनिषदि आस्तिक्यविषये परिभाषा विद्यते यत्– वेदेषु स्मृतिग्रन्थेषु च उक्तधर्मज्ञानं प्रति पूर्णविश्वास एव आस्तिक्तम् इत्युच्यते। तदुक्तञ्च– "श्रोते स्मार्ते च विश्वासो यत्तदास्तिक्यमुच्यते"[19]।

अनुरूपसिद्धान्तः विद्यते मण्डलब्राह्मणोपनिषदि– "आस्तिक्यं नाम वेदोक्तधर्माधर्मेषु विश्वासः"[20]। कायेन मनसा वाचा सम्यक्तया आस्तिक्यानुष्ठनं करोति चेत् फलस्वरूपं मनसि सर्वदा सर्वथा ब्रह्मभावः विद्यते।

**घ. दानम्** –

नियमेषु दानम् अन्यतममस्ति। दा-धातोरुत्तरात् ल्युट्-प्रत्ययसंयोगेन दानमिति पदमुत्पद्यते। यस्य अर्थास्तावत् समर्पणम्, प्रदानञ्चेत्यादयः। अतएव उचितमार्गानुसरणपूर्वकं न केवलमर्जनमपि तु उपयुक्तपात्रेषु दानमपि कर्तव्यम्। यथा दानं तथा पूण्यार्जनमिति। तथा च श्रीमद्भगवद्गीतायाम्—

"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्"[21]॥

न्यायेनार्जितधनं श्रद्धापूर्वकं स्नेहपूर्वकञ्चोपयुक्तपात्रेषु प्रदानमिति दानमुच्यते, शाण्डिल्योपनिषद्याम्नातम्—

"दानं नाम न्यायार्जितस्य धनधान्यादेः श्रद्धयार्थिभ्यः प्रदानम्"[22]।

अनुरूपस्थितिर्विद्यते जावालदर्शनोपनिषदि –

"न्यायार्जितधनं श्रान्ते श्रद्धया वैदिके जने।
अन्यव्दा यत्प्रदीयन्ते तद्दानं प्रोच्यते मया"॥[23]

मानवीयमूल्यबोधे दानस्य भूमिका अनस्वीकार्या, दानेन यथैव स्वीयस्य तथा च अपरजनस्य कल्याणं भवति। न्यायार्जितधनेन श्रद्धापूर्वकं किमपि शुभकर्म क्रियते चेत् मोक्षप्राप्तिः सम्भवति।

**ङ. ईश्वरपूजनम्** –

ईश्वरपूजनमिति नियमः पातञ्जलयोगसूत्रे ईश्वरप्रणिधानमिति नाम्ना सूच्यते। भक्तिविशेषः एव ईश्वरप्रणिधानमिति। परमगुरौ सर्वकर्मार्पणम् ईश्वस्य निरन्तरध्यानं वा ईश्वरप्रणिधानमिति कथ्यते। तथा चोक्तम् – "ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्मार्पणम्"[24]।

शाण्डिल्योपनिषदि विद्यते एवम्— "प्रसन्नचित्ते यथाशक्तिना विष्णुरुद्रादिदेवस्य पूजनम् ईश्वरपूजनम्"[25]। अतएव प्रसन्नचित्तपूर्वकं यथोचितमात्रान्तं विष्णुरूद्रादिदेवानां पूजनमेव ईश्वरपूजनम्। जावालदर्शनोपनिषदि ईश्वरपूजनस्य स्वरूपमेवमस्ति, यथा –

"रागाद्यपेतं हृदयं वागदुष्टानृतादिना।
हिंसादिरहितं कर्म यत्तदीश्वरपूजनम्"॥[26]

अनेन ईश्वरपूजनेन ईश्वरप्रणिधानेन गुरुभक्त्या वा समाधिलाभः शीघ्रः भवति, तथा च साधकस्य आनन्दज्ञानबलादयः वर्धन्ते, अज्ञानदुःखादयः नश्यन्ति। तदुक्तञ्च– "समाधिसिद्धिरीश्वरप्रणिधानात्"[27]।

**च. सिद्धान्तश्रवणम्** –

धर्मः, अधर्मः, विधिः, निषेधः चेति विषये शास्त्रोक्तं नियमश्रवणमेव सिद्धान्तश्रवणमिति।

शाण्डिल्योपनिषदि अस्य परिभाषा विद्यते, यथा– "सिद्धान्तश्रवणं नाम वेदान्तार्थविचारः"[28]। अतएव वेदान्तोक्तार्थस्य श्रवणं चिन्तनं मननञ्च सिद्धान्तश्रवणमिति नाम्ना सूच्यते। पुनश्च परमात्मा सत्यस्वरूपम्, ज्ञानस्वरूपम्, अनन्तस्वरूपम्, परमानन्दस्वरूश्चेति। परमात्माविषये पुनः पुनः एतत् सिद्धान्तश्रवणं खलु सिद्धान्तश्रवणम्। तदुक्तञ्च –

"सत्यं ज्ञानमनन्तं च परानन्दं परं ध्रुवम्।
प्रत्यगित्यवगन्तव्यं वेदान्तेश्रवणं बुधाः"॥[29]

**छ. ह्री–**

ह्री नाम लज्जा। लोकमार्गे तथा च वेदमार्गे यत् कर्म अधमस्वरूपं निन्दियस्वरुपं च तत् कर्म सम्पादनमेव लज्जा ह्री वा कथ्यते। तदुक्तञ्च– "ह्रीर्नाम वेदलौकिकमार्गकुत्सितकर्मणि लज्जा"[30]। पुनश्च—

"वेदलौकिकमार्गेषु कुत्सितं कर्म यद्भवेत्।
तस्मिन्भवति या लज्जा ह्रीः सैवेति प्रकीर्तिता"॥[31]

अतएव तुच्छम् अनुचितं च कर्म करोति चेत् तस्मात् मनसि यत् ग्लान्युत्पन्नं जायते, तदेव लज्जा ह्री वा कथ्यते। लज्जा ह्री वा पालनेन साधकस्य संसारस्य प्रतिविषयं प्रति मान-सम्मानम् आगच्छति।

**ज. मतिः–**

मतिः नाम बुद्धिः। मन् धातोरुत्तरात् क्तिन्-प्रत्ययसंयोगात् मतिः पदं जायते, मन्यते अनेन इति मतिः। जावालदर्शनोपनिषदि विद्यते यत् –

"वैदिकेषु च सर्वेषु श्रद्धा या सा मतिर्भवेत्।
गुरुणा चोपदिष्टोऽपि तन्त्र सम्बन्धवर्जितः"॥[32]

अतएव वेदनिर्दिष्टानि उपदेशानि प्रति श्रद्धा एव मतिः। पुनश्च अनुरूपसिद्धान्तः शाण्डिल्योपनिषदि विद्यते, यथा– "मतिर्नाम वेदविहितकर्ममार्गेषु श्रद्धा"[33]। शुद्धमतियुक्तमानवः समाजस्यशीर्षकासनधारी भवति, समाजे विशेषसम्मानो विद्यते।

**झ. जपः –**

जप-धातुना साकं भावार्थे अप्-प्रत्ययसंयोगे जपः इति पदं जायते, जप्यते अनेन इति जपः। ब्रह्मणः नाम-स्वरूप-गुणस्वभावादिविषयान् मन्त्ररुपेण पुनः पुनः उच्चारणं खलु जपः नाम्ना अभिधीयते। जपस्य परिभाषा– "जपो नाम विधिवद्गुरूपदिष्टवेदाविरुद्धमन्त्राभ्यासः"[34]। अतएव गुर्वनुमतिं प्राप्य वेदोक्तविधिपूर्वकं मन्त्रं पुनः पुनः उच्चारणं हि जपः। तथा च वेदेषु कल्पसूत्रेषु पुराणेषु इतिहासेषु च दीर्घकालान्तं चित्तवृत्तिः एव जपः।

जपः द्विविधः, यथा– वाचिकजपः मानसिकजपश्च। वाचिकजपो नाम मन्त्रस्य अक्षराणि स्पष्टशब्दपूर्वकम् उच्चारणं भवति। वाचिकजपो द्विविधः, उपांशुवाचिकजपः उच्चवाचिकजपश्च। यत्र स्वल्पध्वनिपूर्वकं मन्त्रोच्चारणं भवति, सः उपांशुवाचिकजपः। यत्र उच्चध्वनिपूर्वकं मन्त्रोच्चारणं

भवति, सः उच्चवाचिकजपः। मानसिकजपो नाम मनसा मन्त्रस्य अक्षराणि स्पष्टरूपेण पुनः पुनः चिन्तनम्। इतोऽपि मानसिकजपः मननं ध्यानञ्च भेदेन द्विविधः। जपेन साधकस्य चित्तं निर्मलं विशुद्धं च भवति, यतोहि सर्वदा साधकः परमब्रह्मणि विलीनरूपेण तिष्ठति।

**ञ. व्रतम् –**

व्रतं नाम वेदोक्तविधिरूपकार्यं सम्पादनं पुनश्च वेदोक्तनिषेधरूपकार्यं न सम्पादनमिति। विषयेऽस्मिन् शाण्डिल्योपनिषदि दरीदृश्यते यत्– "व्रतं नाम वेदोक्तविधिनिषेधानुष्ठाननैयत्यम्"[35]।

मनसा कायेन वाचा च व्रतम् अनुशीलयति चेत् साधकः ब्रह्ममार्गत्वात् भ्रष्टो न भवति, यथाशीघ्रं साफलता आयाति।

**साम्प्रतं नियमस्योपादेयता –**

योगसाधनायां प्राचीनकालात् प्रारभ्य साम्प्रतकालान्तं नियमस्य उपादेयता अणुपेक्षणीया। अतएव सर्वदा विचरणशीलान् मानवान् निकषा तपःसन्तोषास्तिक्यदानेश्वरपूजनसिद्धान्तश्रवण-ह्रीमतिजपव्रतानामनुसरणं परिपालनञ्च अतीव आवश्यकमस्ति। अधोलिखिते नियमस्य आवश्यकता आलोच्यते –

* मानसिकस्वास्थ्यस्य विकासो भवति।
* आध्यात्मिकस्वास्थ्यस्य विकासो भवति।
* मानवीयगुणविकासः भवति।
* मानसिकशोकः विनश्यति।
* समाजे स्वच्छता आयाति।
* स्वाध्यायात् ईश्वरपूजनात् च मनसि पवित्रविचारः जायते।
* शौचत्वात् समाजे मैत्रीभावनायाः, दयालुतायाः, आनन्दस्य, ऐक्यस्य च वृद्धिः भवति।
* सन्तोषपालनात् मनसि सन्तुष्टिः जायते,
* तपःसन्तोषास्तिक्यदानेश्वरपूजनजपव्रतादिभिः आततीति नामकायाः समस्यायाः दूरीकरणं सम्भवति।
* एकस्य जनस्य अन्यजनं प्रति तथा च एकस्य देशस्य अन्यदेशं प्रति अन्यायपूर्णप्रतिस्पर्द्धानिवारणं भवति।
* परिवारस्य विघटनसंरक्षणे नियमस्य भूमिका अपरिसीमा।
* आततिविनाशे अपि नियमस्य भूमिका अपरिसीमा।
* समाजे मैत्रीभावना आगच्छति।

## Endnotes

1. योगसूत्रम्, २/३२
2. त्रिशिखिब्राह्मणोपनिषत्, २/२९
3. सिद्धसिद्धान्तपद्धतिः, २/३३
4. योगसूत्रम्, २/३२
5. मण्डलब्राह्मणोपनिषत्, १/४
6. योगतत्त्वोपनिषत्, २९
7. त्रिशिखिब्राह्मणोपनिषत्., ३३-३४
8. शाण्डिल्योपनिषत्, २/१
9. जावालदर्शनोपनिषत्, २/१
10. वराहोपनिषत्, ५/१३-१४
11. योगसूत्रव्यासभाष्यम्, २/३२
12. शाण्डिल्योपनिषत्, २/२
13. जावालदर्शनोपनिषत्, २/३
14. योगसूत्रम्, २/४३
15. योगसूत्रव्यासभाष्यम्, २/३२
16. शाण्डिल्योपनिषत्, २/३
17. जावालदर्शनोपनिषत्,२/५
18. योगसूत्रम्, २/४२
19. जावालदर्शनोपनिषत्,२/६
20. शाण्डिल्योपनिषत्,२/४
21. श्रीमद्भगवद्गीता, १७/२०
22. शाण्डिल्योपनिषत्, २/१
23. जावालदर्शनोपनिषत्,२/७
24. योगसूत्रव्यासभाष्यम्, २/३२
25. शाण्डिल्योपनिषत्, २/६
26. जावालदर्शनोपनिषत्, २/८
27. योगसूत्रम्,२/४५
28. शाण्डिल्योपनिषत्, २/७
29. जावालदर्शनोपनिषत्, २/९
30. शाण्डिल्योपनिषत्, २/८
31. जावालदर्शनोपनिषत्., २/१०
32. तदेव, २/११
33. शाण्डिल्योपनिषत्, २/९
34. तदेव, २/१०

35. तदेव, २/११

## Bibliography


- उपनिषत्सञ्चयनम्. सम्पा. आचार्य केशवलाल वी. शास्त्री, भाग.१, दिल्ली: चौखम्वा संस्कृत प्रतिष्ठान, २०१५.
- उपनिषत्सञ्चयनम्. सम्पा. आचार्य केशवलाल वी. शास्त्री, भाग.२, दिल्ली: चौखम्वा संस्कृत प्रतिष्ठान, २०१५.
- उपनिषत्सञ्चयनम्. सम्पा. आचार्य केशवलाल वी. शास्त्री, भाग.३, दिल्ली: चौखम्वा संस्कृत प्रतिष्ठान, २०१५.
- योग उपनिषदः. सम्पा. सुभाष विद्यालंकार, भाग.१, दिल्ली: प्रतिभा प्रकाशन, २०१८.
- योग उपनिषदः. सम्पा. सुभाष विद्यालंकार, भाग.२, दिल्ली: प्रतिभा प्रकाशन, २०१८